## समवप्रविभ्यः स्थः । (२२/२६८९)

सम् अव प्र वि इत्येवंपूर्वात् तिष्ठते[1]रात्मनेपदं भवति । संतिष्ठते । अवतिष्ठते । प्रतिष्ठते । वितिष्ठते ।

[४२] आङः स्थः प्रतिज्ञाने इति वक्तव्यम् । (म.भा. १.२८०)

अस्ति [2]सकारमातिष्ठते[3] । आगमौ गुणवृद्धी आतिष्ठते (म.भा. १.२८०) ॥

## प्रकाशनस्थेयाख्ययोश्च । (२३/२६९०)

स्वाभिप्रायकथनं प्रकाशनम्[4] । स्थेयस्याख्या स्थेयाख्या । तिष्ठत्यस्मिन्निति स्थेयः । [5]विवादपदनिर्णेता लोके स्थेयः इति [6]प्रसिद्धः । तस्य प्रतिपत्त्यर्थमाख्याग्रहणम् । प्रकाशने स्थेयाख्यायां च तिष्ठतेरात्मनेपदं भवति । प्रकाशने तावत्––तिष्ठते कन्या छात्रेभ्यः । तिष्ठते वृषली [7]ग्रामपुत्रेभ्यः । प्रकाशयत्यात्मानम् इत्यर्थः । स्थेयाख्यायाम्––त्वयि तिष्ठते । [8]मयि तिष्ठते । 'संशय्य कर्णादिषु तिष्ठते यः' (कि. ३.१४) ॥

## उदोऽनूर्ध्वकर्मणि । (२४/२६९१)

उत्पूर्वात् तिष्ठतेरनूर्ध्वकर्मणि वर्तमानादात्मनेपदं [9]भवति । कर्मशब्दः क्रियावाची । [10]अनूर्ध्वताविशिष्ट-क्रियावचनात् तिष्ठते[11]रात्मनेपदं भवति । गेहे [12]उत्तिष्ठते । कुटुम्बे [13]उत्तिष्ठते । तदर्थं[14]यतते इत्यर्थः ।

[४३] उद ईहायामिति वक्तव्यम् । (म.भा. १.२८१)

इह मा भूत्, अस्माद् ग्रामात् शतमुत्तिष्ठति । शतमुत्पद्यते इत्यर्थः । ईहाग्रहणमनूर्ध्वकर्मण एव विशेषणं, नापवादः । अनूर्ध्वकर्मणि इति किम्? आसनादुत्तिष्ठति[15] ॥

## उपान्मन्त्रकरणे । (२५/२६९२)

उपपूर्वात् तिष्ठतेर्मन्त्रकरणेऽ[16]र्थे वर्तमानादात्मनेपदं भवति । ऐन्द्र्या गार्हपत्यमु[17]पतिष्ठते । आग्नेय्या आग्नीध्रमुपतिष्ठते । मन्त्रकरणे इति किम्? भर्तारमुपतिष्ठति यौवनेन ।

[४४] उपाद्देवपूजा[18]सङ्गतकरण[19]मित्रकरणपथिष्विति वाच्यम् । (म.भा. १.२८१)

देवपूजायाम्––आदित्यमुपतिष्ठते । [20]सङ्गतकरणे––रथिकानुपतिष्ठते[21] । [22]मित्रकरणे––महामात्रानुपतिष्ठते । मित्रकरण[23]सङ्गतकरणयोः को विशेषः[24]? [25]सङ्गतकरण[26]मुपश्लेषः । तद्यथा, गङ्गा यमुनामुपतिष्ठते । मित्रकरणं [27]तु विनाप्युपश्लेषेण मैत्रीसम्बन्धः । पथि––अयं पन्थाः [28]स्रुघ्नमुपतिष्ठते ।

---

1. धातोः इत्यधिकम् अ.क. 2. सकारमात्रम् इ.फ.ह. 3. आपिशलः सः इत्यधिकम् ग. 4. उच्यते इत्यधिकम् फ. 5. विवादनिर्णयकर्ता निर्णेता अ.क. 6. रूढः क.ग, रूढिः अ. 7. ग्रामपुत्रकेभ्यः ड. 8. उदाहरणमिदं नास्ति क. 9. भवति नास्ति क. 10. अनूर्ध्वविशिष्ट° क, अनूर्ध्वक्रियतावचनात् ह, अनूर्ध्वकर्मविशिष्टात् क्रियावचनात् न्या. 11. धातोः इत्यधिकम् क. 12, 13. उत्तिष्ठताम् ग. 14. घटते अ.क.ड, पठते ब. 15. शयनादुत्तिष्ठति इत्यधिकम् ह. 16. अर्थे नास्ति अ. 17. उपतिष्ठति क. 18. संगति ब.क.ग. 19. मित्रीकरण इ.ग.ह. 20. संगतिकरणे ब.क.ग. 21. पथिकानुपतिष्ठते इत्यधिकम् क. 22. मैत्रकरणे अ. 23. °संगति ब.क.ग. 24. अस्ति इत्यधिकम् ग. 25. संगति° ब.क.ग. 26. उपश्लेषणं ड. 27. हि ग. 28. विघ्नं ह.